# श्रीमद् भगवद् गीता

# Śrīmad Bhaga-vad Gī-tā

# Chapter 15

| | |
|---|---|
| ॐ हरिः ॐ | om hariḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | hariḥ om |
| ॐ श्री कृष्ण-परमात्मने नमः | om śrī kṛṣ-ṇa-pa-ra-māt-ma-ne namaḥ |
| श्रीमद् भगवद् गीता | śrīmad bha-ga-vad gī-tā |
| अथ पञ्च-दशोऽध्यायः। | atha pañ-ca-da-śo-'dhyā-yaḥ । |
| पुरुषोत्तम-योगः। | pu-ru-ṣot-ta-ma-yo-gaḥ । |

| | |
|---|---|
| ❄श्रीभगवानुवाच। ❄ | ❄śrī-bha-ga-vān-u-vā-ca ।❄ |
| ऊर्ध्वमूलमधःशाखम् | ūr-dhva-mū-lam-a-dhaḥ-śā-kham |
| अश्वत्थं प्राहुरव्ययम्। | aś-vat-thaṁ prā-hu-rav-ya-yam । |
| छन्दांसि यस्य पर्णानि | chan-dāṁ-si yas-ya par-ṇā-ni |
| यस्तं वेद स वेद-वित्॥ १५-१॥ | yas-taṁ ve-da sa ve-da-vit ।।15-1।। |

| | |
|---|---|
| अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः | a-dhaś-cor-dhvaṁ pra-sṛ-tās-tas-ya śā-khāḥ |
| गुण-प्रवृद्धा विषय-प्रवालाः। | gu-ṇa-pra-vṛd-dhā vi-ṣa-ya-pra-vā-lāḥ । |
| अधश्च मूलान्यनुसन्ततानि | a-dhaś-ca mū-lān-ya-nu-san-ta-tā-ni |
| कर्मानुबन्धीनि मनुष्यलोके॥ १५-२॥ | kar-mā-nu-ban-dhī-ni ma-nuṣ-ya-lo-ke ।।15-2।। |

| | |
|---|---|
| न रूपमस्येह तथोपलभ्यते | na rū-pam-as-ye-ha ta-tho-pa-labh-ya-te |
| नान्तो न चादिर्न च सम्प्रतिष्ठा । | nān-to na cā-dir-na ca sam-pra-tiṣ-ṭhā । |
| अश्वत्थमेनं सुविरूढमूलं | aś-vat-tham-e-naṁ su-vi-rū-ḍha-mū-laṁ |
| असङ्गशस्त्रेण दृढेन छित्त्वा ॥ १५-३ ॥ | a-saṅ-ga-śas-tre-ṇa dṛ-ḍhe-na chit-tvā ।।15-3।। |
| | |
| ततः पदं तत्परिमार्गितव्यं | ta-taḥ pa-daṁ tat-pa-ri-mār-gi-tav-yaṁ |
| यस्मिन्गता न निवर्तन्ति भूयः । | yas-min-ga-tā na ni-var-tan-ti bhū-yaḥ । |
| तमेव चाद्यं पुरुषं प्रपद्ये । | tam-eva cād-yaṁ pu-ru-ṣaṁ pra-pad-ye । |
| यतः प्रवृत्तिः प्रसृता पुराणी ॥ १५-४ ॥ | ya-taḥ pra-vṛt-tiḥ pra-sṛ-tā pu-rā-ṇī ।।15-4।। |
| | |
| निर्मान-मोहा जितसङ्ग-दोषाः | nir-mā-na-mo-hā ji-ta-saṅ-ga-do-ṣāḥ |
| अध्यात्म-नित्या विनिवृत्त-कामाः । | adh-yāt-ma-nit-yā vi-ni-vṛt-ta-kā-māḥ । |
| द्वन्द्वैर्विमुक्ताः सुखदुःख-संज्ञैः | dvan-dvair-vi-muk-tāḥ su-kha-duḥ-kha-sañ-jñaiḥ |
| गच्छन्त्यमूढाः पदमव्ययं तत् ॥ १५-५ ॥ | gac-chan-tya-mū-ḍhāḥ pa-dam-av-ya-yaṁ tat।।15-5।। |
| | |
| न तद्-भासयते सूर्यः | na tad-bhā-sa-ya-te sūr-yaḥ |
| न शशाङ्को न पावकः । | na śa-śāṅ-ko na pā-va-kaḥ । |
| यद्-गत्वा न निवर्तन्ते | yad-gat-vā na ni-var-tan-te |
| तद्-धाम परमं मम ॥ १५-६ ॥ | tad-dhā-ma pa-ra-maṁ ma-ma ।। 15-6।। |

| | |
|---|---|
| ममैवांशो जीव-लोके | ma-mai-vāṁ-śo jī-va-lo-ke |
| जीव-भूतः सनातनः। | jī-va-bhū-taḥ sa-nā-ta-naḥ \| |
| मनःषष्ठानीन्द्रियाणि | ma-naḥ-ṣaṣ-ṭhā-nīn-dri-yā-ṇi |
| प्रकृतिस्थानि कर्षति॥ १५-७॥ | pra-kṛ-tis-thā-ni karṣati \|\| 15-7\|\| |
| | |
| शरीरं यदवाप्नोति | śa-rī-raṁ ya-da-vāp-no-ti |
| यच्चाप्युत्क्रामतीश्वरः। | yac-cāp-yut-krā-ma-tīś-va-raḥ \| |
| गृहीत्वैतानि संयाति | gṛ-hīt-vai-tā-ni saṁ-yā-ti |
| वायुर्गन्धानि-वाशयात्॥ १५-८॥ | vā-yur-gan-dhā-ni-vā-śa-yāt \|\| 15-8\|\| |
| | |
| श्रोत्रं चक्षुः स्पर्शनं च | śro-traṁ cak-ṣuḥ spar-śa-naṁ ca |
| रसनं घ्राणमेव च। | ra-sa-naṁ ghrā-ṇam-eva ca \| |
| अधिष्ठाय मनश्चायं | a-dhiṣ-ṭhā-ya ma-naś-cā-yaṁ |
| विषयानुपसेवते॥ १५-९॥ | vi-ṣa-yā-nu-pa-se-va-te \|\| 15-9\|\| |
| | |
| उत्क्रामन्तं स्थितं वापि | ut-krā-man-taṁ sthi-taṁ vā-pi |
| भुञ्जानं वा गुणान्वितम्। | bhuñ-jā-naṁ vā gu-ṇān-vi-tam \| |
| विमूढा नानुपश्यन्ति | vi-mū-ḍhā nā-nu-paś-yan-ti |
| पश्यन्ति ज्ञानचक्षुषः॥ १५-१०॥ | paś-yan-ti jñā-na-cak-ṣu-ṣaḥ \|\| 15-10\|\| |

| | |
|---|---|
| यतन्तो योगिनश्चैनं | ya-tan-to yo-gi-naś-cai-naṁ |
| पश्यन्त्यात्मन्यवस्थितम् । | paś-yan-tyāt-manya-vas-thi-tam । |
| यतन्तोऽप्यकृतात्मानः | ya-tan-to'p-ya-kṛ-tāt-mā-naḥ |
| नैनं पश्यन्त्यचेतसः ॥ १५-११ ॥ | nai-naṁ paś-yan-tya-ce-ta-saḥ ॥ 15-11॥ |
| | |
| यदादित्यगतं तेजः | ya-dā-dit-ya-ga-taṁ te-jaḥ |
| जगद्-भासयतेऽखिलम् । | ja-gad-bhā-sa-ya-te-'khi-lam । |
| यच्चन्द्रमसि यच्चाग्नौ | yac-can-dra-ma-si yac-cāg-nau |
| तत्तेजो विद्धि मामकम् ॥ १५-१२ ॥ | tat-te-jo vid-dhi mā-ma-kam ॥ 15-12॥ |
| | |
| गामाविश्य च भूतानि | gā-mā-viś-ya ca bhū-tā-ni |
| धारयाम्यहमोजसा । | dhā-ra-yām-ya-ham-oja-sā । |
| पुष्णामि चौषधीः सर्वाः | puṣ-ṇā-mi cau-ṣa-dhīḥ sar-vāḥ |
| सोमो भूत्वा रसात्मकः ॥ १५-१३ ॥ | so-mo bhūt-vā ra-sāt-ma-kaḥ ॥ 15-13॥ |
| | |
| अहं वैश्वानरो भूत्वा | a-haṁ vaiś-vā-na-ro bhūt-vā |
| प्राणिनां देहमाश्रितः । | prā-ṇi-nāṁ de-ham-ā-śri-taḥ । |
| प्राणापान-समायुक्तः | prā-ṇā-pā-na-sa-mā-yuk-taḥ |
| पचाम्यन्नं चतुर्विधम् ॥ १५-१४ ॥ | pa-cām-yan-naṁ ca-tur-vi-dham ॥ 15-14॥ |

सर्वस्य चाहं हृदि सन्निविष्टः	sar-vas-ya cā-haṁ hṛ-di san-ni-viṣ-ṭaḥ
मत्तः स्मृतिर्ज्ञानम्-अपोहनञ्च । mat-taḥ smṛ-tir-jñā-nam-a-po-ha-nañ-ca |
वेदैश्च सर्वैरहमेव वेद्यः ve-daiś-ca sar-vai-ra-ham-eva ved-yaḥ
वेदान्तकृद्वेदविदेव चाहम् ॥ १५-१५ ॥ ve-dān-ta-kṛd-ve-da-vi-de-va cā-ham || 15-15||

द्वाविमौ पुरुषौ लोके dvā-vi-mau pu-ru-ṣau lo-ke
क्षरश्चाक्षर एव च । kṣa-raś-cāk-ṣa-ra eva ca |
क्षरः सर्वाणि भूतानि kṣa-raḥ sar-vā-ṇi bhū-tā-ni
कूटस्थोऽक्षर उच्यते ॥ १५-१६ ॥ kū-ṭas-tho-'kṣa-ra uc-ya-te || 15-16||

उत्तमः पुरुषस्त्वन्यः ut-ta-maḥ pu-ru-ṣas-tvan-yaḥ
परमात्मेत्युदाहृतः । pa-ram-āt-met-yu-dā-hṛ-taḥ |
यो लोकत्रयमाविश्य yo lo-ka-tra-yam-ā-viś-ya
बिभर्त्यव्यय ईश्वरः ॥ १५-१७ ॥ bi-bhar-tyav-ya-ya īś-va-raḥ || 15-17||

यस्मात्क्षरम्-अतीतोऽहम् । yas-māt-kṣa-ram-a-tī-to-'ham |
अक्षरादपि चोत्तमः । akṣa-rād-api cot-ta-maḥ |
अतोऽस्मि लोके वेदे च a-to's-mi lo-ke ve-de ca
प्रथितः पुरुषोत्तमः ॥ १५-१८ ॥ pra-thi-taḥ pu-ru-ṣot-ta-maḥ || 15-18||

| | |
|---|---|
| यो मामेवमसम्मूढः | yo  mām-e-vam-a-sam-mū-ḍhaḥ |
| जानाति पुरुषोत्तमम् । | jā-nā-ti  pu-ru-ṣot-ta-mam । |
| स सर्वविद्-भजति मां | sa  sar-va-vid-bha-ja-ti  māṁ |
| सर्व-भावेन भारत ॥ १५-१९ ॥ | sar-va-bhā-ve-na bhā-ra-ta॥ 15-19॥ |
| इति गुह्य-तमं शास्त्रम् | iti  guh-ya-ta-maṁ  śās-tram |
| इदमुक्तं मयानघ । | idam-uk-taṁ  ma-yā-na-gha । |
| एतद्-बुद्ध्वा बुद्धिमान्स्यात् | e-tad-bud-dhvā  bud-dhi-mān-syāt |
| कृत-कृत्यश्च भारत ॥ १५-२० ॥ | kṛ-ta-kṛt-yaś-ca  bhā-ra-ta ॥ 15-20॥ |
| ॐ तत्सत् | om  tat-sat |
| इति श्रीमद्-भगवद्-गीतासु | iti  śrīmad-bhaga-vad-gī-tā-su |
| उपनिषत्सु | upa-ni-ṣat-su |
| ब्रह्म-विद्यायां | brahma-vid-yā-yāṁ |
| योग-शास्त्रे | yoga-śās-tre |
| श्रीकृष्णार्जुन-संवादे | śrī-kṛṣ-ṇār-juna-saṁ-vā-de |
| पुरुषोत्तम-योगो नाम | pu-ru-ṣot-ta-ma-yo-go  nāma |
| पञ्च-दशोऽध्यायः ॥ | pañ-ca-da-śo-'dhyā-yaḥ ॥ |
| ॐ हरिःॐ | om  hariḥ  om |
| श्री गुरुभ्यो नमः | śrī  guru-bhyo  namaḥ |
| हरिः ॐ ॥ | hariḥ  om ॥ |